**|| श्री स्वामी समर्थ ||**

---

## ||महा बुद्धि अथर्वशीर्ष |

---

श्रीगणेशाय नमः ।

ॐ भद्रं कर्णेभिः शृणुयाम देवा ।भद्रं पश्येमाक्षभिर्यजत्राः ॥

स्थिरैरङ्गैस्तुष्टुवांसस्तनूभिः । व्यशेम देवहितं यदायुः ॥

ॐ स्वस्ति न इन्द्रो वृद्धश्रवाः । स्वस्ति नः पूषा विश्ववेदाः ॥

स्वस्तिनस्तार्क्ष्यो अरिष्टनेमिः । स्वस्ति नो बृहस्पतिर्दधातु ॥

ॐ तन्मामवतु तद् वक्तारमवतु अवतु माम् अवतु वक्तारम् ।

ॐ शांतिः । शांतिः ॥ शांतिः॥

ॐ नमस्ते सरस्वती । त्वमेव प्रत्यक्षं ब्रह्मविध्यासि ।

त्वं महाबुद्धिः। त्वमेव महाविध्यासि ।

त्वं गुणत्रयविरहितासि ।त्वं निरुपाधिमायासि ।

त्वं विध्यासि ।त्वं ज्ञानमय्यसी ।

त्वं साक्षाद्बुद्धिरसि ।श्रुत्याधष्टविध्यास्त्वत्तो जाताः।

त्वत्तस्तिष्ठन्ती ।त्वयि लयमेष्यन्ती ।

त्वं महाबुद्धिर्ब्रह्मशक्तिः।त्वधोगात परं ब्रह्म ज्ञानदो भवति ।

त्वं शुध्द सत्त्व प्रधान मय्यसी ।त्वदीय सत्व गुणात सदजायत ।

रजसश्चदजायत । तमसश्चानन्दमः जायत ।
त्वं सच्चिदानन्दद्वयासी नित्यं ।त्वं गुहास्वरुपासि ।
त्वं द्वादशामृत मय्यसी ।त्वं ज्ञान शक्तिरसि ।
त्वं बुद्धितत्वात्मिकासि ।त्वं पञ्चचित्तवृत्तमय्यसी ।
त्वां योगिनो ध्यायंति नित्यम् ।त्वं अष्टविध्यासि ।
त्वं पञ्चदेववरदासि ।

त्वं मेघा त्वं प्रज्ञा त्वं भक्तिसत्वं शान्तिसत्वं समाधिरसि भूर्भुवर्सूवरोम ।
ॐकार पूर्वमुच्चार्य वाग्मीजं तदनन्तरं ।
नमो बुद्ध्यै परतरः एतत्तव मनुस्वरूपं ।
ॐ ऐं नमो बुद्ध्यै ।
वाणीश्वर्वरीच विद्महे सरस्वती च धीमहि ।तन्नो बुद्धिः प्रचोदयात् ।
ॐ बीजं ।ऐं शक्तिः ।नमः किलकम् ।
त्रिविदैर्न्यासाः ।

ध्यानम
श्वेताम पद्मकधारिणीं स्मितमुखीं श्वेताम्बरालंकृतां।
दक्षे लम्बकरां शशान्कमकुटां तुङ्गस्तनीकन्जुकां ।
विघ्नेशेक्षणसंयुताम गणपतेर्दक्षेस्थितां भामिनीं ।
चम्पामाल्यधरां विधिशविनुतां बुद्धिंपरां भावये ।

या विध्या ब्रह्ममहिळा परब्रह्मस्वरुपिणीं ।
नमस्तस्यै नमस्तस्यै महाबुद्ध्यै नमो नमः ।

अद्वैत ब्रह्मणश्शक्तिः या विध्या निरुपाधिका
नमस्तस्यै नमस्तस्यै महाबुद्ध्यै नमो नमः ।

या विध्या वेदजननि ब्रह्मज्ञानस्वरुपिणी ।
नमस्तस्यै नमस्तस्यै महाबुद्ध्यै नमो नमः ।

या विध्या ज्ञान जननि ज्ञानचक्षुस्वरुपिणी ।
नमस्तस्यै नमस्तस्यै महाबुद्ध्यै नमो नमः ।

या विध्यामृतजननि सच्चिदानन्द् रुपिणी ।
नमस्तस्यै नमस्तस्यै महाबुद्ध्यै नमो नमः ।

नमो वागीश्वर्यै महाबुद्ध्यै सरस्वत्यै महावाण्यै महाविध्यायै
बुद्ध्यै विध्यायै वाण्यै भारत्यै ब्रह्मज्ञानात्मिकायै
सच्चिदनन्दरूपीण्यै ब्रह्मविध्यायै नमो नमः।

इदम अथर्वशीर्षं महाबुद्धेर्योऽधीते स विध्यावान भवति ।
स कविर्भवति।स स्वानंदभवनं गच्छती।
न च पुनरावर्तते । न च पुनरावर्तते ।
इत्युपनिषत ।

ॐ भद्रं कर्णेभिः शृणुयाम देवा ।भद्रं पश्येमाक्षभिर्यजत्राः ॥

स्थिरैरङ्गैस्तुष्टुवांसस्तनूभिः । व्यशेम देवहितं यदायुः ॥

ॐ स्वस्ति न इन्द्रो वृद्धश्रवाः । स्वस्ति नः पूषा विश्ववेदाः ॥
स्वस्तिनस्ताक्ष्र्यो अरिष्टनेमिः । स्वस्ति नो बृहस्पतिर्दधातु ॥
ॐ तन्मामवतु तद् वक्तारमवतु अवतु माम् अवतु वक्तारम्
ॐ शांतिः । शांतिः ॥ शांतिः॥

इति श्री विनायक तंत्रे श्री बुद्धि अथर्वशीर्षं नाम अष्टादश पटलः

---

॥ श्री गुरुदत्तात्रेयार्पणमस्तु ॥

|| श्री स्वामी समर्थार्पण मस्तु||